# Kapilaprachandadiprokta Shivarchanamahima

# કપિલપ્રચણ્ડાદિપ્રોક્તા શિવાર્ચનમહિમા

## Document Information

Text title : Kapilaprachandadiprokta Shivarchanamahima

File name : kapilaprachaNDAdiproktAshivArchanamahimA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 40 | vAvRittashlokAH ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 31, 2024

*sanskritdocuments.org*

# કપિલપ્રચણ્ડાદિપ્રોક્તા શિવાર્ચનમહિમા

કપિલઃ -
(ઇન્દિરે)શરણં યાહિ શઙ્કરં લોકશઙ્કરમ્ ।
સ સર્વમઙ્ગલાકાન્તો મઙ્ગલાનિ પ્રયચ્છતિ ॥ ૪૨॥

સ સર્વમઙ્ગલાકારઃ સર્વમઙ્ગલદાયકઃ ।
મઙ્ગલાનાં સ જનકોઽપ્યમઙ્ગલહરો હરઃ ॥ ૪૩॥

અમઙ્ગલહરે સતિ ત્રિપુરકાનનધ્વંસકે
પ્રચણ્ડતરપાવકે મદનમર્દકે સંસ્મૃતે ।
અમઙ્ગલસરિદ્ધરપ્રલય એવ તાવદ્ભવેત્
સમુદ્રતનયે સદા શુભનદીસમૂહોદયે ॥ ૪૪॥

ન કોઽપિ જાનાતિ શિવપ્રભાવમતો ન તસ્ય સ્મરણે પ્રવૃત્તઃ ।
અતો વિનાશો ભવતીતિ મન્યે સદા મહાદેવપરાઙ્મુખાનામ્ ॥ ૪૫॥

કેનાપિ દૃષ્ટં ન મહેશરૂપં શુભપ્રવાહાત્મકમપ્રમેયમ્ ।
સ્મૃતે શિવે ચેતસિ મઙ્ગલાનિ પદે પદે શોભનદાનિ નિત્યમ્ ॥ ૪૬॥

પ્રચણ્ડઃ -
કૈલાસવાસી ભગવાનેકસ્તિષ્ઠતિ શઙ્કરઃ ।
તત્પૂજકાનામસ્માકં ભયં સમ્ભાવિતં ચ ન ॥ ૭૧॥

પૂજયસ્વ મહાદેવં લિઙ્ગરૂપિણમવ્યયમ્ ।
અપારૈરુપચારૈસ્તં ભયં સન્ત્યજ સન્ત્યજ ॥ ૭૨॥

યદા મોહેન નાસ્માકં શિવે ભક્તિર્ભવિષ્યતિ ।
તદા ભયં ભવત્યેવ દુઃખધારા પદે પદે ॥ ૭૩॥

યેન સ્મૃતો મહાદેવઃ સંસારાત્ સ વિમુચ્યતે ।
ભયાનાં તત્ર કા વાર્તા ભયલેશોઽપિ વા કથમ્ ॥ ૭૪॥

ક્રૂરઃ -
મૃત્યુઞ્જયાભ્યર્ચનેન જયઃ ખલુ પદે પદે ।
અતો જયાર્થં યત્નેન યજેન્મૃત્યુઞ્જયં પ્રભુમ્ ॥ ૧૨૫॥

લક્ષ્મીઃ -
પુનઃ પુનરિદં જ્ઞાતં શઙ્કરારાધનં વિના ।
સુખં નેતિ વિશેષેણ જ્ઞાતમત્ર ન સંશયઃ ॥ ૧૩૯॥

સર્વજ્ઞેન જ્ઞાયતે ધર્મતત્વં યોગાભ્યાસાત્ શઙ્કરારાધનેન ।
એતત્સર્વં નિશ્ચયેનાશુ તાવત્ વક્તવ્યં મે યેન દુઃખાપહારઃ ॥ ૧૪૨॥

ન જાને ન જાને ન જાને ન જાને શિવાન્યં ન જાને ન જાને ન જાને ।
શિવારાધનેનૈવ સૌખ્યપ્રવૃદ્ધિઃ શિવારાધનેનૈવ સમ્પત્પ્રવૃદ્ધિઃ ॥ ૩૨૩॥

સુરાઃ
યત્સામર્થ્યમપારવેદનિકરૈર્ન જ્ઞાયતે સર્વથા
યત્પાદામ્બુજપૂજયા જડમતિર્વાગીશ્વરીવલ્લભઃ ।
સ્યાલ્લક્ષ્મીરમણઃ શચીપતિરપિ સ્વાદિન્દુરગ્નિસ્તથા
ભાનુશ્ચેતિ તમીશ્વરં ગિરિસુતાકાન્તં ભજે સન્તતમ્ ॥ ૩૮૨॥

યં ભક્તામરભૂરુહં સુરકુલારાધ્યં ચ સિદ્ધાર્ચિતં
ગન્ધર્વાદિસમર્થિતં ચ પરમં પ્રાહુસ્તમેકં શિવમ્ ।
ધ્યાત્વા ચિત્તમનન્તપાતકકુલાપારાટવીકોટરા-
પારાગ્નિં સુખરૂપમેત્ય સતતં તચ્ચિન્તનાભ્યુદ્ધૃતમ્ ॥ ૩૮૩॥

તં વન્દે મુહુરાદરેણ ગિરિજાવક્ષોજકાશ્મીરજાપાર-
શ્રીરસરઞ્જિતં પ્રવિલસત્કસ્તૂરિકાચિત્રિતમ્ ।
તત્પાટીરરસાભિરૂષિતમપિ વ્યાપ્તં દુકૂલોત્તમૈઃ
હારાપારવિરાજમાનવપુષં જોષં પ્રદોષેષ્વપિ ॥ ૩૮૪॥

યલિઙ્ગાદભવત્ સમસ્તમસકૃદ્ભૂમણ્ડલં કુણ્ડલી
યત્કર્ણોત્તમકુણ્ડલં મણિગણશ્રીમણ્ડલાલઙ્કૃતમ્ ।
તં હારોત્તમમાનસામ્બુજવસં શ્રીકર્ણિકાશ્રિતં
શ્રીકાન્તાર્ચિતપાદુકં ભજ મનઃ શૈલાત્મજાકામુકમ્ ॥ ૩૮૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કપિલપ્રચણ્ડાદિપ્રોક્તા શિવાર્ચનમહિમા સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૪૦। વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 40. vAvRRittashlokAH ..

Proofread by Ruma Dewan

*Kapilaprachandadiprokta Shivarchanamahima*

pdf was typeset on January 31, 2024

Please send corrections to *sanskrit@cheerful.com*